सुपेशसा । विश्वे देवा अमर्त्याः । त्रिष्टुप्छन्द इन्द्रियम् । पष्ठवाड्गौ
र्वयो दधुः । दैव्या होतारा भिषजा । इन्द्रेण सयुजा युजा । जगती छन्द
इहेन्द्रियम् । अनड्वान्गौर्वयो दधुः । तिस्र इडा सरस्वती । भारती मरुतो
विशः । (४६) विराट्छन्द इहेन्द्रियम् । धेनुर्गौर्न वयो दधुः । ~~[illegible]~~
त्वष्टा तुरीपो अद्भुतः । इन्द्राग्नी पुष्टिवर्धना । द्विपाच्छन्द इहेन्द्रियम् ।
उक्षा गौर्न वयो दधुः । शमिता नो वनस्पतिः । सविता प्रसुवन्भगम् ।
ककुप्छन्द इहेन्द्रियम् । वशा वेहद्गौर्न वयो दधुः । स्वाहा यज्ञं वरुणः ।
सुक्षत्रो भेषजं करत् । अतिच्छन्दा इछन्द इन्द्रियम् । बृहदृषभो गौ
र्वयो दधुः । (४७) ।४

वसन्तेनर्तुना देवाः । वसवस्त्रिवृता स्तुतम् । रथन्तरेण तेजसा । हविरिन्द्रे वयो
दधुः । ग्रीष्मेण देवा ऋतुना । रुद्राः पञ्चदशे स्तुतम् । बृहता यशसा बलम् ।
हविरिन्द्रे वयो दधुः । वर्षाभिरृतुना । दित्याः । स्तोमे सप्तदशे स्तुतम् । (४८)
वैरूपेण विशौजसा । हविरिन्द्रे वयो दधुः । शारदेनर्तुना देवाः । एकविंश
ऋभवस्स्तुतम् । वैराजेन श्रिया । श्रियम् । हविरिन्द्रे वयो दधुः । हेमन्तेनर्तुना
देवाः । मरुतस्त्रिणवे स्तुतम् । बलेन शक्वरीस्सहः । हविरिन्द्रे वयो दधुः
शैशिरेणर्तुना देवाः । त्रयस्त्रिंगंशेमृतगं स्तुतम् । सत्येन रेवतीः क्षत्रम् ।
हविरिन्द्रे वयो दधुः । (४९) ।५

पृथिवी अन्तरिक्षम्। सूर्य आत्मा जगतस्तस्थुषश्च। त्वष्टा दधत्तन्न
स्तुरीपम्। त्वष्टा वीरं पिशङ्गरूपः। दशेमं त्वष्टुर्जनयन्त गर्भम्।
अतन्द्रासो युवतयो बिभर्त्रम्। तिग्मानीकग्ं स्वयशसं जनेषु। वि
रोचमानं परिषीन्नयन्ति। आविष्ट्यो वर्धते चारुरासु। जिह्मानां
मूर्ध्वः स्वयशा उपस्थे। (52) उभे त्वष्टुर्बिभ्यतुर्जायमानात्। प्रतीची
सिग्ंहं प्रतिजोषयेते। मित्रो जनान्प्रसमित्र। अयं मित्रो नमस्यस्सु
शेवः। राजा सुक्षत्रो अजनिष्ट वेधाः। तस्य वयग्ं सुमतौ यज्ञियस्य।
अपि भद्रे सौमनसे स्याम। अनमीवास इडया मदन्तः। मितज्ञवो
वरिमन्ना पृथिव्याः। आदित्यस्य व्रतमुपक्षियन्तः। (53) वयं मित्रस्य सु
मतौ स्याम। मित्रं न ईग्ं शिम्या गोषु गव्यवः। स्वाधियो विदथे अप्सु
जीजनन्। अरेजयताग्ं रोदसी पाजसा गिरा। प्रति प्रियं यजतं जनुषा
मवः। महाग्ं आदित्यो नमसोपसद्यः। यातयज्जनो गृणते सुशेवः।
तस्मा एतत्पन्यतमाय जुष्टम्। अग्नौ मित्राय हविरा जुहोत। आवाग्ं
रथो रोदसी बद्बधानः। (54) हिरण्ययो वृषभिर्यात्वश्वैः। घृतवर्तनिः
पविभी रुचानः। इषां वोढा नृपतिर्वाजिनीवान्। स पप्रथानो अभि पञ्च भूमा।
त्रिवन्धुरो मनसा यातु युक्तः। विशो येन गच्छथो देवयन्तीः। कुत्राचि
द्याममश्विना दधाना। स्वश्वा यशसा यातमर्वाक्। दस्रा निधिं मधुमन्तं
पिबाथः। विवाग्ं रथो वध्वा यादमानः। (55) अन्तान्दिवो बाधते

मूलं प्रजां विन्देयेति। स एतं प्रजापतये मूलाय चरुं निरवपत्।
ततो वै स मूलं प्रजामविन्दत। मूलग्ं ह वै प्रजां विन्दते। य एतेन
हविषा यजते। य उ चैनदेवं वेद। सोऽत्र जुहोति। प्रजापतये स्वाहा। मूलाय
स्वाहा। प्रजायै स्वाहेति। (44) आपो वा अकामयन्त। समुद्रं काम
मभिजयेमेति। ता एतमद्भ्योऽषाढाभ्यश्चरुं निरवपन्। ततो वै
तास्समुद्रं काममभ्यजयन्। समुद्रग्ं ह वै काममभिजयति। य एतेन
हविषा यजते। य उ चैनदेवं वेद। सोऽत्र जुहोति। समुद्राय स्वाहा।
कामाय स्वाहा। अभिजित्यै स्वाहेति। (45) विश्वे वै देवा अकाम
यन्त। अनपजय्यं जयेमेति। त एतं विश्वेभ्यो देवेभ्योऽषाढाभ्य
श्चरुं निरवपन्। ततो वै तेऽनपजय्यमजयन्। अनपजय्यग्ं ह वै
जयति। य एतेन हविषा यजते। य उ चैनदेवं वेद। सोऽत्र जुहोति।
विश्वेभ्यो देवेभ्यस्स्वाहा। षाढाभ्यस्स्वाहा। अनपजय्याय स्वाहा।
जित्यै स्वाहेति। (46) ब्रह्म वा अकामयत। ब्रह्मलोकमभिजयेय
मिति। तदेतं ब्रह्मणेऽभिजिते चरुं निरवपत्। ततो वै ब्रह्म ब्रह्मलोकमभ्यजयत्।
ब्रह्मलोकग्ं ह वा अभिजयति। य एतेन हविषा यजते। य उ चैनदेवं वेद।
सोऽत्र जुहोति। ब्रह्मणे स्वाहा। अभिजिते स्वाहा। ब्रह्मलोकाय स्वाहा। अभिजित्यै

